# A-I/1/2315/ 22

## द्वितीयसत्रार्द्धम्

## प्रथमपत्रम्

## मीमांसा

**समयः घण्टात्रयम्** **पूर्णाङ्काः 80**

**अ. सर्वे अतिलघूत्तरीयाः प्रश्नाः समाधेयाः।** **(15×2=30)**

1. ऊहस्य कति भेदाः? नामग्राहं लिखत।
2. देवताप्रसादो न फलसाधनमिति खण्डदेवेन कस्य मतस्य निष्कर्षः कृतः?
3. अपूर्वसाधनत्वलक्षणाया उदाहरणं दर्शयत।
4. वृत्तिकारमते आरम्भशब्दार्थः कः?
5. भाष्यकारादिमते आरम्भशब्दार्थः कः?
6. प्रयाजादीनामुद्देश्यतावच्छेदकं किम्?

**अथवा**

अग्नये जुष्टं निर्वपामीति मन्त्रे सौर्ययागे कस्य पदस्य ऊहः?

7. मुख्यद्रव्यालाभे कस्य प्रतिनिधित्वेन ग्रहणम्?
8. पार्थसारथिमते गतश्रीशब्दस्य कोऽर्थः?

**अथवा**

धान्यशब्दस्य कोऽर्थः?

9. आरम्भणीयेष्टेः उद्देश्यं किम्?
10. आग्नेययागस्य निर्वापे को मन्त्रः?
11. ज्योतिष्मतीष्टिः कदा कार्या?

**अथवा**

पृष्ठस्तोत्रे बृहद्रथन्तरयोः समुच्चयो विकल्पो वा?

12. पौण्डरीकाणि बर्हींषि भवन्तीत्यस्य कोऽर्थः?

**अथवा**

अपूर्वदेवताप्रसादयोः कतरत् फलसाधनम्?

13. अवहननस्य उद्देश्यतावच्छेदकं किम् ?

**अथवा**

पाशाधिकरणविषयवाक्यं लिखत।

14. ऐरं कृत्वोद्गेयमित्यस्य कोऽर्थः ?

15. ऊहस्य एकमुदाहरणं दर्शयत।

**ब. सर्वे लघूत्तरीयाः प्रश्नाः समाधेयाः।** **(5×6=30)**

16. अगन्मेति मन्त्रस्य स्वर्गत्वमुद्देश्यतावच्छेदकमपूर्वसंबन्धित्वं वेति विचारयत।

17. इरापदस्य गिरापदस्थानापत्तिः नियता अनियता वेति चिन्तयत।

18. स्तोभानामतिदेशो भवेन्न वेति विचारयत।

**अथवा**

ऊहग्रन्थस्य अपौरुषेयत्वमुत पौरुषेयत्वमिति चिन्तयत।

19. मन्त्रोऽहं तदपवादं च सोदाहरणमुपपादयत।

**अथवा**

प्रास्मा अग्निं भरत इति मन्त्रस्य कथमूह इति यथाग्रन्थं विचारयत।

20. द्वादशाहे पत्नीसंयाजान्तत्वं किं सर्वेष्वहस्सु उत उत्तमवर्जमिति विचारयत।

**अथवा**

दूरापदं प्रगीतं प्रयोक्तव्यमुत अप्रगीतमिति चिन्तयत।

**स. दीर्घोत्तरीयः प्रश्नः समाधेयः।** **(1×20=20)**

21. ऊहसिद्ध्यौपयिकतया उद्देश्यसमर्पकपदे अपूर्वसाधनत्वलक्षणां समर्थयत।

**अथवा**

विविधैरुदाहरणैः सामोहं विचारयत।

# A-I/2/2316/ 22

## द्वितीयसत्रार्द्धम्

## द्वितीयपत्रम्

## मीमांसा

**समयः घण्टात्रयम्** **पूर्णाङ्काः 80**

**अ. सर्वे अतिलघूत्तरीयाः प्रश्नाः समाधेयाः।** **(15×2=30)**

1. प्रसङ्गः कुत्र प्रतिपादितः? तस्य लक्षणं किम्?
2. के पञ्च प्रयाजाः?
3. आग्नेययागस्य उत्पत्तिवाक्यं किम्?
4. अवघातः कियत्पर्यन्तं कर्तव्यः?
5. मा हिंस्यादित्यत्र कपिञ्जलन्यायः कुतः न प्रवर्तते?
6. दशपेयाभिषेचनीयौ कुत्र पठितौ? तौ द्वौ यागौ उत न?
7. चातुर्मास्येषु चत्वारि पर्वाणि कानि?
8. आधानेष्टेः प्रकृतिः का?
9. सभ्याग्निः कुत्र भवति?
10. कस्य समुदायस्य राजसूय इति व्यवहारः?
11. ज्योतिष्टोमे कति पशुयागाः सन्ति?

**अथवा**

ब्राह्मणोत्पन्नमन्त्रस्य उच्चारणं केन स्वरेण?

12. दर्शपूर्णमासयोः इष्टिप्रकृतित्वे किं बीजम्?

**अथवा**

मन्त्रलक्षणं किम्?

13. प्रकरणादङ्गत्वे उदाहरणं किम्?

**अथवा**

गुणविधेः उदाहरणं किम्?

14. किं नाम आरादुपकारकत्वम्? उदाहरणम् लिखत।

**अथवा**

विद्वद्वाक्यं किम्?

15. अङ्गगुणविरोधन्यायस्य सूत्रं किम्?

**अथवा**

के जपसंज्ञका: मन्त्रा:?

**ब. सर्वे लघूत्तरीया: प्रश्ना: समाधेया:।** **(5×6=30)**

16. आग्नेयादीनां तन्त्रेण फलजनकत्वं यथाग्रन्थं विवृणुत।

**अथवा**

कामनाभेदेन काम्यकर्मणामावृत्तिं यथाग्रन्थं निरूपयत।

17. कपिञ्जलाधिकरणं यथाग्रन्थं विवृणुत।

18. आग्नेयादीनां तन्त्रेणानुष्ठाने युक्ती: प्रदर्शयत।

**अथवा**

यज्ञपात्रेषु तन्त्रनियमं ग्रन्थोक्तदिशा विवृणुत।

19. निर्वापे प्रत्यभ्यासं मन्त्रावृत्ति: उत नेति यथाग्रन्थं प्रतिपादयत।

**अथवा**

पशुपुरोडाशे अवघाताज्यभागादीनामङ्गानामनुष्ठानं यथाग्रन्थं प्रतिपादयत।

20. प्रसङ्गलक्षणं सदलप्रयोजनं सोदाहरणञ्च प्रतिपादयत।

**स. एकस्य प्रबन्धात्मकमुत्तरं लिखत।** **(1×20=20)**

21. धर्म:।

**अथवा**

प्रयोगविधि:।

# A-I/3/2317/ 22

## द्वितीयसत्रार्द्धम्

## तृतीयपत्रम्

## मीमांसा

**समयः घण्टात्रयम्** **पूर्णाङ्काः 80**

**अ. सर्वे अतिलघूत्तरीयाः प्रश्नाः समाधेयाः।** **(15×2=30)**

1. भट्टपादानां कृतयः काः?

2. किं नाम तन्त्रम्?

**अथवा**

शूर्पपदार्थं वर्णयत।

3. भावनाभिधानं कस्मात् भवति?

4. अध्ययनविधिना का प्रतिज्ञा स्वीक्रियते?

5. रोदनपदार्थं यथाग्रन्थं लिखत।

**अथवा**

प्रवृत्तिनिवृत्त्योः कार्यं कीदृशं दृश्यते?

6. निन्दार्थवादः कः? सः कुत्र श्रूयते?

7. अर्थवादानां भावनायां कया विधया अन्वयः?

8. अर्थवादभेदाः के?

**अथवा**

अर्के चेन्मधु विन्देत. . . . .इति न्यायस्य आशयः कः?

9. 'फलविधिः उत अर्थवादः' इति को विचारः?

10. औदुम्बरवाक्यार्थः कः?

11. हेतुवन्निगदाधिकरणे कः सन्देहः?

12. अभ्युपेत्यवादो नाम कः?

**अथवा**

विवक्षितवचनाः मन्त्राः कथम्?

13. प्रयाजादीनां चारितार्थ्यं कथम्?

14. किं नाम सम्बोधनम्, तेषां कार्यं किम्?

15. के नास्तिकपदाभिधेयाः?

**अथवा**

नियमविधिं विवृणुत।

**ब. सर्वे लघूत्तरीयाः प्रश्नाः समाधेयाः।** **(5×6=30)**

16. 'अयमेव परीक्षाकालः वर्तते' इदं वाक्यं सप्रसङ्गं व्याख्यात।

**अथवा**

'न हि निन्दा निन्द्यं निन्दितुम्' इमं न्यायं सप्रसङ्गं विवेचयत।

17. अपूर्वविधिं विवेचयत।

**अथवा**

तेन ह्यन्नं क्रियते इत्यत्र ग्रन्थे विषयः कथं प्रतिपादितः?

18. भावानां तस्याः भेदान् च व्याख्यात।

**अथवा**

परिसंख्याविधिं सोदाहरणं व्याख्यात।

19. अर्थवन्तो मन्त्राः उत अनर्थकाः इति विवेचयत।

20. स्पष्टे शब्दात् प्रतीतेऽर्थे नानर्थक्यं हि शङ्क्यते।
अग्नौ दहति दृष्टे वा दग्धृत्वं किं विचार्यते॥ –यथाग्रन्थं विषयं विवेचयत।

**स. दीर्घोत्तरीयः प्रश्नः समाधेयः।** **(1×20=20)**

21. अर्थवादानां विध्येकवाक्यत्वं साधयत।

**अथवा**

हेतुवन्निगदाधिकरणमारचयत।

# A-I/4/2318/ 22

## द्वितीयसत्रार्द्धम्

## चतुर्थपत्रम्

## मीमांसा

**समयः घण्टात्रयम्** **पूर्णाङ्काः 80**

**अ. सर्वे अतिलघूत्तरीयाः प्रश्नाः समाधेयाः।** **(15×2=30)**

1. स्तम्भादिबाह्यार्थे प्रत्यक्षं प्रवर्तत इति कस्य मतं? पूर्वपक्षिणः सिद्धान्तिनो वा?

**अथवा**

कुतः ग्राह्यग्राहकयोरेकमेव आकारवदित्युक्तम्?

2. एकस्यापि वस्तुनो भिन्नाकारबुद्धेरुदाहरणं लिखत।
3. तिष्यशब्दः कस्मिन् लिङ्गे प्रयोक्तव्यः?
4. एकस्यैव ग्राह्यत्वं ग्राहकत्वं च कुतो न संभवति?
5. प्रमाता ज्ञातसंबन्ध इति पक्षे ज्ञातसंबन्धपदस्य विग्रहं लिखत।

**अथवा**

ज्ञातः संबन्धो ययोरिति विग्रहे ज्ञातसंबन्धपदेन कयोर्ग्रहणम्?

6. व्यापकत्वव्याप्यत्वयोः कस्य अनुमित्यङ्गत्वम्?
7. अप्रयोजकद्वयमुदाहरत।

**अथवा**

पक्षवचनं कथं कर्तव्यम्?

8. अनुमानस्य अनुपलब्धिविरोधमुदाहरत।

**अथवा**

शास्त्रशब्देन पदं गृह्यते वाक्यं वा? कुतः?

9. शाब्दज्ञानमपि अनुमानं के मन्यन्ते?
10. उपमानलक्षणं भाष्योक्तं लिखत।

**अथवा**

श्रुतार्थापत्तिमुदाहरत।

11. वर्णानामर्थप्रत्यायकत्वे को दोषः?

12. स्फोटस्य अभिव्यञ्जकं किम्?

13. सिद्धान्ते कः अर्थप्रत्यायकः?

14. शब्दार्थयोः संश्लेषः संबन्धो न भवति कुतः?

15. शब्दार्थयोः संबन्धः कः?

**ब. सर्वे लघूत्तरीयाः प्रश्नाः समाधेयाः।** **(5×6=30)**

16. अर्थाकारस्य ज्ञानाकारत्वेन भानं खण्डयत।

17. शब्दविरोधमनुमानस्य सभेदं वर्णयत।

18. उपमानस्य अनुमानेन अगतार्थत्वं साधयत।

**अथवा**

संभवैतिह्ययोः स्वरूपं, क्लृप्तेषु अन्तर्भावं च प्रदर्शयत।

19. चित्रेष्टिविधिवाक्यस्य अप्रामाण्यशङ्कां वर्णयत।

**अथवा**

श्रुतार्थापत्तिं वर्णयत।

20. चतुर्विधमभावमुदाहरणेन स्पष्टीकुरुत।

**अथवा**

नैयायिकरीत्या अर्थापत्तिं अनुमाने अन्तर्भावयत।

**स. प्रश्नस्य निबन्धात्मकमुत्तरं लिखत।** **(1×20=20)**

21. शून्यवादसिद्धान्तं वर्णयत।

**अथवा**

शब्दप्रमाणं विस्तरेण निरूपयत।